कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालय

मासमीमांसाग्रन्थः

(म० म० गोकुलनाथोपाध्याय विरचित:)

सम्पादकः

(१) पं०श्री धर्मनाथ झा

प्रकाशकः

कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः

दरभङ्गा

म० म० गोकुलनाथ ग्रन्थावल्यां
पञ्चमं पुष्पम्

म० म० गोकुलनाथोपाध्याय-
विरचितोयं

मासमीमांसाग्रन्थः

पं० सदाशिवविरचिता शौचविमर्शश्च ।

गङ्गौली ग्रामवासि प० श्रीधर्मनाथझाशर्मणा सम्पादितः
दर्शनविभागाध्यक्षेण पं० श्रीरामसेवकशर्मणा संशोधितः ।

प्रकाशकः—
कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः
दरभङ्गा

हरिशयन एकादशी १९८१ ई०

भूमिका

माध्यन्दिन मूर्धन्येनाष्टादश विद्यास्थानकोविदेनवैदेहेन महामहोपाध्याय गोकुलनाथोपाध्यायेनं निर्मितः कुमतिकल्पित कुतर्कशुष्कतृणवात्या चक्रायमाण सुयुक्तिव्रातपरिवृतो मासमीमाँसामिधो निबन्धः पण्डितप्रवरसदाशिव शर्मणा विरचितेन मिथिलाव्यवहारसम्मते नाशौचविमर्शनाम्ना निबन्धेनसह प्रकाश्यते। मासमीमांसामिधे निबन्धे निबन्धा साम्वत्सरिकादिकृत्योपयुक्त मासपदार्थोऽन्यत्र दुर्लभ दर्शनोन्यरुपि। साम्वत्सरिकादि कृत्येषु मासोल्लेखस्याङ्गतया कालांशे यथाशक्त्यनवकाशात् मासोल्लेखाङ्गक कर्मणां मासप्रमितिमन्तराऽशक्य सम्पादनतया निबन्धस्यास्योपादेयतानायासेनैव सिद्धयति। निबन्धुः पाण्डित्य प्रकर्ष प्रकाशन निवन्ध एवायमलम्।

महामहोपाध्याय गोकुलनाथोपाध्यायाः सप्तदश्यांशताब्द्यां मिथिला ललाम भूते मङ्गलवनी (मङ्गरौनी) नाम्नि ग्रामे समुदभूवन्निति प्रकृतनिबन्धस्थेन वाक्यद्वयेन प्रतीयते।

तथाहि—"अस्मिन्नेवैक त्रिंशदधिक षोड़श शताङ्किते (१६३१) शककाले वैशाखोमलमासः इति तदधुनापि संभवत्येव। सम्प्रति हि शकाब्दा एकत्रिंशदधिक षोड़शशती," इति च। यस्मिन् वर्षे द्वावसंक्रान्तमासौ, तत्रोत्तर एवाधिमासः कर्मार्न्हो न पूर्वोधिमासः। न कस्यापि मासस्यलोपस्तस्मिन्वर्षं इति निरणायि प्रकृतनिबन्धे निबन्धकृता, क्षयोलोप इत्यादिः सजातोयकालान्तरे कालानुप्रवेशविषया परिभाषा, सावनदिनप्रविष्टे चान्द्रदिने तिथिक्षय इति वार्हस्पत्यवर्षप्रविष्ठे चान्द्रवर्षे वर्षक्षय इति व्यवहारात्।

तथा च द्विसंक्रान्तमासे सौरकार्त्तिकान्तर्भावान्मासक्षय इति परि-भाषा, इत्यादिना। कामेश्वरसिंह दरभंगा सं० वि० विद्यालयस्य कुलपतिपदमधि तिष्ठन्तो धीमन्तो जीर्णग्रन्थोद्धरण बद्धरागाः पं० श्री जयमन्तमिश्रमहाभागाः साधुवादार्हाः। येषां सत्प्रयासेन निबन्धाविमौ प्रकाशनकर्मतामञ्चतः। एतत्सम्पादको गङ्गौलीग्रामवासि नैयायिक झोपाख्य पं० श्री धर्मनाथशर्मा धन्यवादार्हः।

अत्रोहापोह वैगुण्येन सम्भाविताविशेषामशुद्धि स्वयमेव संशोधयन्तु सुधिय इति।

पं० श्री रामसेवक झा
दर्शन विभागाध्यक्षः
कामेश्वरसिंह दरभङ्गा सं० वि० विद्यालयः

माध्यन्दिन मूर्धन्य मैथिलफणदह कुलालङ्कार
महामहो गोकुलनाथ कुलद्रुमः ।

म० म० भवानीदत्तस्य प्रपौत्रस्य पुत्रपौत्रादयः सम्प्रति मङ्गलवनी
(मङ्गरौनी) ग्रामे निवसन्ति ।

म० म० कृष्णदत्तः म० म० विष्णुदत्तः म० म० भवानीदत्तः

सर्वस्वदाता म० म० रघुनाथः म० म० लक्ष्मीनाथः

म०म० त्रिलोचनः म०म० धनञ्जयः प्र०दण्डपाणिः म०म० गोकुलनाथः
म०म० जगन्नाथः

पण्डितराज पदाङ्कित म० म० मधूसुदनः विद्यानिधि म० म० पीताम्बरः
म०म० वागीशः म०म० उमानन्दः म०म० रतीशः ।

म० म० रामभद्रः

म० म० हरिहर प्रसिद्धनिकारः

म० म० रुचिपतिः

ओं नमो गणेशाय ।

मासमीमांसा

[1]सोमं [2]सामन्ततं [3]नत्वा [4]मासि सोमा[5]वतंसिनम् ।
समासान्मासमीमांसामस्मिन्वक्तुं व्यवस्थितः ।

मासस्त्वाषच्चतुर्द्धा भवति । चान्द्रः, सौरः, सावनो, नाक्षत्र-स्चेति । तत्र चान्द्रस्त्रिविधः । बहुलपक्षस्यादिः पौर्णमास्यन्तः । शुक्लप्रतिपदादिरमावास्यान्तः । अनियतत्रिंशत्तिथिघटितश्चान्द्र साव-नश्चेति । तत्र प्रथमेकृष्णादिमासेप्रमाणम्, दीक्षाग्रहणे चैत्रमासप्रशं-सिकाश्रुतिः । तथाहि, "चित्रापूर्णमासे दीक्षेरन्मुखंवा एतत्सम्वत्सरस्य यच्चित्रा पूर्णमासोमुख्यततएवारभ्य दीक्षन्ते इत्पाम्नायते ।" तत्र-चित्रापदेन चित्रा चन्द्रसंयोगविशिष्ट पञ्चदशीस्वरुपः कालोलक्ष्यते, तत्र पूर्णस्तदारब्ध[6]स्तदनन्तर तिथ्यमारब्धो योमसः कृष्णादि चैत्रः तत्र दीक्षां प्रतिपद्येरन्नित्यर्थः। स्मृतिश्च 'अथभाद्रपदेमासि कृष्णा-ष्टम्यां कलौयुगे", इत्यादिका श्रावणपूर्णिमानन्तर कृष्णपक्षे भाद्रपद-पद्व्यवजहार । अश्वयुक्कृष्णपक्षेत्विरयादिकाच स्मृतिराषाढ़ीतः

---

१ शिवम् २ समन्वात्स्थितम् ३ सामवेदवान् ४ श्चन्द्रः । सामन्तमिति यथा-श्रुतप ठेतु मासमित्परय ब्रह्मविष्णुसंहृत मित्यर्थः ।

५ ततमित्यस्य प्रपञ्चरूपेणविस्तीर्णमित्यर्थः ।

६ तदनन्तर तिथ्यनारब्धः तदनन्तर तिथ्यघटितः । तथाच चित्रासंयुक्त चन्द्र-संयोगविशिष्ट पञ्चदशीरूप तिथ्यात्मककालघटितत्वेसति तादृशकालोत्तर प्रतिपदादि तिथ्यघटितमासत्वं कृष्णादिचैत्र मासत्वम् ।

पञ्चमः पक्षोश्वयुक्पक्षइति व्यवजहार। तस्मान्मासपदस्य चैत्रादिशब्दस्य चास्ति कृष्णादौ मासेरूढिः। व्याकरणवाक्यपूर्णमासादणित्यनेनानुशासनेन पूर्णोमासोऽस्मिन्निति विग्रहे पौर्णमासपदं विधाय नक्षत्रेणयुक्तःकाल इत्यनुशासनेन मघादिनक्षत्राधिष्ठित चन्द्रोपलक्षितेकाले माघादिपदंव्युत्पाद्य माघीपौर्णमासी यस्मिन्मासि स माघ इति व्युत्पत्तिं ग्राहयितुं 'सास्मिन्पौर्णमासीति संज्ञायामित्यनुशासने। नमघायुक्तायां पौर्णमास्यां पूर्णोमास एवं माघादिपदार्थं इत्यवसीयते। अथ पूर्णोमासश्चन्द्रमा इतिव्युत्पत्त्या पूर्णमासशब्दो न मासपूर्त्तिं प्रतिपादयति, किन्तु चन्द्रस्यपूर्णताम् तत्परस्तादण्प्रत्ययोपि पूर्णचन्द्रोपलक्षितां तिथि मुपलक्षयति, नतु मासपूर्त्युपलक्षितामति माघादिशब्दोपि मघायुक्तपूर्णचन्द्रोपलक्षितातिथिघटितंमासमभिधत्ते। सच शुक्लादिः कृष्णादिर्वेति नविनिगन्तुं शक्यत इति चेत्। अदन्तमासशब्दस्य चन्द्रवाचकत्वाभावात्। मासश्चन्द्रमासयोः पुंसीति त्रिकाण्डशेखे राजासमुद्र नवनीततमोनुदौमाग्लौ विन्दुरेण तिलशोहरिरोहिणीशाचितिहाराचन्यां हलन्तस्यैवपाठात्। पाणिनात्वदन्तपूर्णमासशब्दादेवाणप्रत्यय विधानात्। अतएव "चक्रवत्परिवर्त्तेत कालः सूर्यवशाद्यतः, अतस्साम्वत्सरश्राद्धं कर्त्तव्यंमासचिह्नितम्। मासचिह्नन्तुकर्त्तव्य पौषमाघाद्यमेवहि। यतस्तत्रविधानेन मासः सपरिकीर्त्तितइति साम्वत्सरिकादौ मृत तिथि व्यभिचारिणं सौरमासमपहाय चान्द्रमासोल्लेखः कर्त्तव्यः। सापि पौषमाघादिपदेनोल्लेख्यः। माघादिपदार्थस्तु मघायुक्तपौर्णमासी पूर्णोमासस्तत्रैव व्याकरणेन

१ संज्ञाग्रहणमिति—इदश्चवृत्तिकृदभिमत सूत्र पाठानुसारेण येतु सूत्रे संज्ञायामितिनपठन्ति तेषां विभक्तिशब्दात्संज्ञायामितिलभ्यते तद्रीत्यातु प्रकृते इति शब्दग्रहणमितियोग्यम्।

माघादिपदविधानात्, नह्यन्यस्यमासस्यपूर्त्तिः पौर्णमासीपदेनान्योमास-श्चाणप्रत्ययेनाभिधीयत इति वक्तुं युक्तम् व्यर्थत्वात् माघादिपदे पौर्ण-मास शब्दस्याश्रूयमाणत्वादणप्रत्ययेन पूर्णोमासोमिधीयते । तथाच मघायुक्ततिथौ पूर्णोमासएव माघादिपद प्रतिपाद्यः । एवञ्च माघी-पद् मघायुक्ततिथिवाचिपरम् । तत्परःप्रत्ययस्तु तदनन्तरतिथ्यघटित तद्घटितमासवाचीत्येवपक्षोवक्तव्यः ।

नच मघायुक्तपञ्चम्यादिपर्यवसित सावनचान्द्रमासेऽतिव्याप्तिः सर्वपक्षेपि मघायुक्तपौर्णमासीक मासत्वस्य माघादिपदप्रवृत्तिनिमित्त-स्य व्यभिचारितयायोगेन प्रवृत्तिनिमित्तान्तरस्योपलक्षणीयत्वात् । अतएव पाणिनीयसूत्रे सञ्ज्ञाग्रहणमर्थवत् संज्ञ पदेन योगार्थोऽविव-क्षितः, रूढ्यर्थस्य परामर्षात् ।

यदितु प्रकृतेप्रवृत्तिनिमित्तकुक्षौयोगोनप्रविशति तदा यतस्तत्र-विधानेनेतिहेतुमन्निगदोनोपपद्यते तस्मात्कृष्णादिरेवमासः साम्वत्सरि-कादावुल्लिखितुं युज्यत इतिपरमगुरवः ।

युज्यतेचैतत्—"पार्वणे त्वष्टकाश्राद्धे चान्द्रमिष्टन्तथाब्दिक" इति वाक्येऽष्टकास हचर्येण कृष्णादिचान्द्रस्यैवाब्दिकनिमित्तत्वावसायात् । तथाहिपार्वणे साग्निकर्तृक चन्द्रक्षयनिमित्तकामावास्याश्राद्धे चन्द्र-क्षयकालमाह । छन्दोगपरिशिष्टे ।

"अष्टमांऽशे चतुर्दश्याः क्षीणोभवतिचन्द्रमाः अमावस्याष्टमांशेतु ततःकिलभवेदणु । तेन चतुर्दश्यमावास्ययोरष्टमेयामे सूक्ष्मतालक्ष-णोऽमावास्यायाः सप्तसु यामेषु ध्वंसस्वरूपश्चन्द्रस्यक्षयोविद्यत इति, नवयामाः पिण्डान्वाहार्यकश्राद्धे स्वरुपयोग्याः, "पिण्डान्नाहार्यकं-श्राद्धं क्षीणेराजनि शस्यत" इति तेनैवाभिधानात् । तथा । "आग्रहा-

ध्ययमावास्या तथाज्येष्ठस्य यामवेत्। विशेषमाभ्यां श्रुवते चन्द्रचारविदोजनाः। "अत्रेन्दुराद्ययेप्रहरेवतिष्ठते चतुर्थभागोनकलाविशिष्टः। तदन्त एवच्चयमेतिकृत्स्न एवं ज्योतिश्चक्रविदोवदन्ति।" आभ्यां— अनयोरमावास्ययोः विभक्तिव्यत्ययश्छान्दसः। अत्रैतयोरमावास्ययोराद्यप्रहरे चतुर्थभागोन कलावशिष्टत्वेन चीणः सोमोवतिष्ठते, नतु चतुर्दश्यष्टमयामे अखण्डकलावशिष्टत्वात्, तदन्ते ऽमावास्याप्रथमयामान्ते, सप्तसुयामेऽषुकृत्स्नश्चन्द्रः चयमेत्यर्थात्प्रतिपत्प्रथम यामेचीणस्समुत्पद्यतेऽतः सम्पूर्णामावास्या प्रतिपत्प्रथमेयामश्चेति नवयोर्मं मार्गज्येष्ठयोश्चन्द्रचयकालः पार्वणयोग्यइत्यर्थः। तत्र क आग्रहायणः कोवाज्येष्ठोग्राह्य इत्याकांक्षायां "पार्वणे चान्द्रमित्युक्तम्" तत्रापि कृष्णादिरेव चान्द्रोग्राह्यः। अमावास्याचात्र कृष्णादिक्रमेणेतिपरिशिष्टटीकादर्शनात्।

अपिच—"चतुरष्टको हेमन्तस्थाः सर्वास्समांशाध्रिकीर्षेति" गोभिलसूत्रस्युक्तसम्वत्सरपक्षमाश्रित्य हेमन्तोऽभिहितः सनूतापरसौरैमार्गादिमासैर्घटितः। मार्गाष्टकायाः सौरहेमन्तव्यभिचारदर्शनात्। नापि शुक्लादि मार्गमासादिघटित आग्रहायण्या उर्द्ध तिस्रोष्टका तिस्रोऽन्वष्टकाः क्रमेणापूपमांसशाकैरिति कात्यायनोक्ताष्टकात्रय प्राचीनायाः काम्याष्टकायाश्चतुर्थ्या गोभिलेनाभिधानात्। अतः कृष्णादिमास घटितएव हेमन्तोऽष्टकायामुपादेयः। एतदुभय साहचर्यादाब्दिकेपि कृष्णादि चान्द्रएवोपादातुं युज्यते।

अन्यथा चान्द्रमिष्टमित्यत्र चान्द्रपदस्यनानार्थतापत्तिः। द्वितीयस्तु शुक्लपक्षेत्यादिरमावास्यान्तश्चान्द्रः। तत्रप्रमाणन्तु, "सावैशाखस्यामावास्या भवति यारोहिण्यासम्बद्धत इतिश्रुतिः" तत्र रोहिणी-

पदेनतद्घटितो वृषराशिरभिधीयते । तथाच वृषराशिस्थित सूर्यपर्यवसिता-मावास्यान्तो मासो वैशाख इत्यभिहितं भवति । एतन्मूलकमेव ब्रह्मगुप्त-वाक्यम् ।

"मेषादिस्थे सवितरि योयोमासः प्रपूर्यतेचान्द्रः । चैत्रादिस्सविज्ञेयः पूर्त्तिद्वित्वेऽधिमासोऽन्त्यइति । यत्र चैत्रपूर्णिमाऽनन्तरकृष्णचतुर्दश्यां मेषरवि० संक्रान्तिस्ततोमामतीत्य प्रतिपदि द्वितीयायांवा संक्रान्तिस्तत्रा संक्रान्तोमासश्चैत्रलक्षणावरुद्धत्वाच्चैत्रपदवाच्य एव भवतीतिभावः ।

लघुहारीतः । "इन्द्राग्नीयत्रहूयेते मासादिः सप्रकीर्त्तितः । अग्निषोमौ स्मृतौमध्ये समाप्तौ पितृसोमकौ" । इन्द्राग्नी-दर्शदेवेते, यत्र—यस्या-न्तिथौ, हूयेते—होमोद्देश्यौक्रियेते, सशुक्लप्रतिपद्रूपो मासादिः ।

अग्निषोमौ—पौर्णमासदेवौ, यत्रोद्दिश्यहोमःक्रियते तन्मासमध्यं पिण्डपितृयज्ञाङ्गी भूताग्नौ करणदेवते पितृसोमावुद्दिश्य यस्यान्तिथौ हूयेते तस्याममावास्यायां मासस्समाप्यत इत्यर्थः । अत्रमासपदप्रवृत्तिनिमि-त्तानि प्रारम्भमध्यावसानघटितानि त्रीणिलक्षणानि, तेनशुक्लादिचान्द्रमास एव मासपदं मुख्यम्, अन्यत्रगौणमितिबहवः ।

परमगुरवस्तु—इन्द्राग्नी, इत्यादिवचन समभिव्याहारेणैव लघुहारी-तेन, "तमतिक्रम्यतुरविर्यदा गच्छेत्कदा न आद्योमलिम्लुचोज्ञेयो द्वितीयः प्राकृतः स्मृत"—इत्यभिहितम् । तंलक्षणत्रयोपलक्षितंमासंयावत् अतिक्रम्य-राश्यन्तरमसंक्रम्यरविर्मासान्तरंगच्छेत्—राश्यन्तर संक्रमेत्, तयोराद्यः अति-क्रमणीयोमासो मलिम्लुचपदवाच्य इतिज्ञेयः । द्वितीयो रविसंक्रान्तिमा-न्मासः प्रकृतइतिस्मर्त्तव्य इत्यर्थः । साच मलिम्लुचपदप्रवृत्तिनिमित्तपरि-चयोपक्षीणो न मासपदशक्तिग्राहकः । पदार्थोपस्थितिस्तु भक्त्यापिसुस्या-सम्भवतीतिमासपदं चान्द्रसामान्यस्यैव योगेन वाचकम् । मस्यन्ते—परि-

मीयन्ते तिथयोऽनेन समासइतिव्युत्पत्तेः। मसपरिमाणेइतिधात्वनुसारात्।

यदि चैन्द्राग्नी, इत्यादिवाक्यं मासपद प्रवृत्तिनिमित्तनिर्वचनंस्यात्तदा शुक्लप्रतिपदारब्धत्व पूर्णिमामध्यत्वमावास्यावसानत्वानां त्रयाणां मध्येद्वयोर्वैयर्थ्यंस्यात्। यत्रामावास्या चरमक्षणानन्तरमेव सङ्क्रान्तिद्वयं तत्र सौरमासेऽतिव्याप्तिवारणायस्त्वत्वयनादावातिव्याप्तेश्चवारणाय चान्द्रमासत्व प्रवेशस्यावश्यकत्वेन शुक्लप्रतिपदादि चान्द्रोमासत्वस्यैव समर्थत्वेन पूर्णिमामध्यत्वादेव व्यावर्त्तकत्वात्। शुक्लादिकृष्णादि सावनमासेष्वनुगतं चान्द्रमासत्वं ऐकातिथिःक्वापीत्यादिवचनसिद्धमग्रे निर्वक्ष्यते।

अथलघुहारीतवाक्ये मासपदप्रवृत्ति निमित्तानि त्रीणि पृथगेवानूद्यन्ते। तदनुवादप्रयोजनन्तु मासविशेषाभिधायिनाश्चैत्रादिपदानामपि प्रारम्भमध्यावसानघटितानि त्रीणि प्रवृत्तिनिमित्तानि सन्तीतिज्ञापनमेव। तथाहि—"मीनादिस्थे रवौयेषामारम्भः प्रथमेक्षणे। तेऽब्देचान्द्रमसामासाश्चैत्राद्याद्वादशास्मृता इतिमीनादित्योत्पन्न शुक्लप्रतिपदारब्ध मासत्वमेकम्। मेषगरविसंक्रान्तिः शशिमासेभवतियत्रतच्चैत्रम्।

एवं वैशाखाद्या वृषादि संक्रान्तियोगेनेति। रवेर्मेषसंक्रमोत्पत्त्यधिकरणत्वेसतिमुख्यचान्द्रमासत्वंद्वितीयम्। सावैशाखस्यामावास्या भवति या रोहिण्यासम्बद्ध्यत इतिश्रुतिस्वरसमिद्धम्, मेषादित्यपूर्णमासत्वम्। तृतीयं चैत्रपदप्रवृत्तिनिमित्तम्, वैशाखादावप्येवंयोजनीयम्। मैवम्। इत्थमपि मासपदप्रवृत्तिनिमित्तनिर्वचनमिदं लघुहारीतवचनमित्यत्र प्रमाणानुपन्यासात्

भवतुवा मासशब्दः शुक्लादौचान्द्रेमुख्यः तेन मासपुरस्कारेण विहितानि प्रायश्चित्तव्रतादीनि तत्रैवमाशेङ्क्रियन्ताम्।

यत्रतु साम्वत्सरिकादौ—"मार्गचिह्नन्तु कर्त्तव्यं पौषमाघायमेवहि"

इतिमासशब्दसामानाधिकरण्येन माघादि शब्दप्रयोगः—कर्माङ्गत्वेनदेशितः, तत्र मासशब्दस्ययोगमाश्रित्य चान्द्रमाससामान्यवाचिनो माघादिशब्दस्यच कृष्णादि चान्द्रवाचिनः प्रयोगएव युज्यते ।

तथाहि—माघादिपदे मघाशब्दः ततस्तद्धितस्ततो ङीप्प्रत्ययस्ततोऽण प्रत्ययश्चेति शब्दावयवाः, तत्र मघाशब्दोन नक्षत्रस्वरूपाभिधायी नवा तत्संयुक्त चान्द्राभिधायी, स्वरूपेण मघायास्सार्वकालिकत्वान्मघाचन्द्रयोः सयोगस्यच माघ्यामप्यनुपलभ्यमानत्वात् । किन्तु मघाशब्दो मघाचन्द्रयोः सादेश्यमभिधत्ते, सन्तिच नक्षत्राधिष्ठितस्य नित्यं प्रत्यंमुखप्रवहनशीलस्य प्रवहवातगोलस्य द्वादशभागाःप्रत्येकं प्राधान्येन कस्यचिन्नक्षत्रस्याधिष्ठान-तया प्रसिद्धाः, रेवत्यश्विनी भरणीनामधिष्ठानं भचक्रभागः प्राधान्यादश्वि-न्यधिष्ठानतया कृत्तिकारोहिण्या रधिष्ठानं कृत्तिकाधिष्ठानतया व्यवह्रियते तथामृगशिरोधिष्ठानतया तथाविधाश्विनी देशाधिष्ठितश्चन्द्रोऽश्विनीत्य-श्लेषा मघयोरधिष्ठानं देशमधिष्ठितस्तु माघेत्युपचर्यते । अत्रच—"अन्त्यो-पान्त्यौ त्रिभौज्ञेयौ फाल्गुनश्चत्रिभोमतः । शेषामासाद्विभाज्ञेयाः कृत्तिकादि-व्यवस्थये"ति ज्योतिषवचनाद्व्यवस्थावोद्धव्या । अन्त्योपान्त्यौ भाद्रा-श्विनौ । त्रिभौ—शतभिषगादिलक्षत्रयाधिष्ठानाधिष्ठित पूर्णचन्द्रौ । फाल्गुन-स्त्रिभः—पूर्वफल्गुन्यादि त्रिकसदेशपूर्णचन्द्रः शेषामासाः कार्त्तिकादयः । कृत्तिकादि गणनयाद्विभाः । कृत्तिका रोहिणीत्यादि द्विकसमानाधिकरण पूर्णचन्द्र इति ज्योतिर्व्याख्येयम् ।

इदमपि यदिक्वापिव्यभिचरति, तदाकृत्तिकाधिष्ठानं गोलभागः शृङ्गाटिकया वैजात्यविशेषेणवोपलक्षणीयः । तस्मान्मघासमानदेशश्चन्द्रा-र्थकः न मघापदादण्प्रत्ययोनिष्पन्नः । तथाविधचन्द्राधिकरणंकालमाह—तदनन्तरोत्पन्न स्त्रीप्रत्ययः तस्यकालस्य पौर्णमासीत्वमभिधत्ते । अतएव, पुष्ययुक्ता पौर्णमासीपौषीत्यमरः । अतएव माघीप्रौष्ठपदूर्ध्वं कृष्णत्रयोद-

शोचेत्यत्र माघीतिपदं न त्रयोदशीविशेषणमपितु माघपूर्णिमा स्वतन्त्र एव नित्यश्राद्धकाल इतिबहवः। वस्तुतस्तु। नैतद्युक्तम्, पौर्णमास्यभिधाने स्त्रीप्रत्ययस्यासामर्थ्याद् व्याकरणेन तथाननुशासनाच्च, किन्तु माघीपदेन-मघायुक्तातिथिः पञ्चदशीवाऽभिधीयते, तदनन्तरोत्पन्नस्तद्धितस्तु माघस्य-पौर्णमासीत्यधिकृत्यदेश्यते पूर्णोमासोऽस्यामितविग्रहे तदधिकरणक पूर्त्ति-कर्त्तामासइतिवाक्यार्थः।

पौर्णमासीपदेतु मासकर्तृकपूर्त्तेरधिकरण मितिपदार्थः। माघीपौर्ण-मास्यस्येतिविग्रहे मासकर्तृक पूर्त्यधिकरणं माघीतिथिरस्येतिवाक्यार्थः। माघपदेतुमाघ्यभिन्नाधिकरणक पूर्त्तिकर्त्तामासइतिपदार्थः। विग्रहवाक्येन येषां पदार्थानामन्वयोबोध्यते, तेषामेव विशेषणविशेष्यभावव्यत्यासेनान्य प्रधानकात्, परिनिष्ठितवृत्तिपदाद्बोध इतिव्युत्पत्तेः।

अतएव यत्कर्मकप्राप्तिकर्तृ उदकमितिप्राप्तमुदकं यमिति विग्रह-वाक्येन बोध्यते। प्राप्तोदकमितिबहुव्रीहिणातूदककर्तृक प्राप्तिकर्मेत्यव-गम्यते।

एवञ्चात्राप्यस्यमाघी पौर्णमासीतिविग्रहे माघी मासकर्तृक पूर्त्य-धिककरणमितिबोधः। माघइति तद्धितान्तेतु माघ्यधिकरणकपूर्तिकर्त्ता-मास इतिबोधः, तेनकृष्णादिचान्द्रएव माघादिपदार्थः। असतिविशेषवचने स एवोल्लेख्यः। यानितु शुक्लादिमासानांलक्षणानि तानि न माघादि-पदानांशक्तिग्राहकाणि। किन्तु, शुक्लादिचान्द्राणां इतरव्यवच्छेदकानि अन्यायश्चानेकार्थकत्वमितिप्राहुः।

तृतीयस्सावनश्चान्द्रः। तत्रप्रमाणम्। मुख्यंश्राद्धं मासि मासि अपर्याप्त वृत्तंप्रति। द्वादशाहेनवा भोज्या, "एकाहेद्वादशाथवेतमरीचिः"-मासिमासिपूर्णेऽपरमासारम्भतिथौ मासिकमिति मुख्यः श्राद्धकल्पः। अथ-

यद्याशक्तौ ऋतु प्रतिद्वयोर्द्वयोस्तथाविधमासयोः पूर्णयोर्द्वे मासिके इति द्वितीयः कल्पः। अथवा द्वादशाह मुपक्रम्य द्वादशभिर्दिवसैर्द्वादश-मासिकानिकृत्वा त्रयोदशेह्नि सपिण्डीकरणमिति तृतीयः कल्पः। भोज्या-इतिप्रेतब्राह्मणा इतिशेषः। एकाहे अशौचान्ततृतीयदिने ब्राह्मणा द्वादश-मासिकश्राद्धपात्रभूता भोज्याइति तुरीयः कल्पः।

अत्र मासऋतुश्च सावनएवसम्भवति। तल्लक्षणन्तु—

"एकातिथिः कापितदादिभूतातिथिस्तृतीयेति तिथि प्रबन्धः।
मासस्सचान्द्र स्तिथिनाम्नियस्माच्चान्द्रींकलामाप्य सदाप्रवृत्तिः।"

एकातिथिःकापि अवसाने मासारम्भिकागणनीया तामारभ्य विलोम-गणनया तृतीयासजातीयतिथिगत त्रिसंख्यापूरिकातिथिस्सामासादि मास-वहिर्भूता मर्यादाकल्पनीया। यथा शुक्लपञ्चम्यन्तमासे पूर्वतृतीयपक्ष षष्ठ्यां मासारम्भेपञ्चमीमर्यादात्वमापद्यते, तेन चैत्रशुक्लषष्ठ्यादिवैशाखशुक्ल पञ्च-म्यन्तोमासस्सिद्धयति। त्रिंशत्तिथिघटितमासश्चान्द्रमास इतिलक्षण चान्द्र-मात्रस्याभिव्यापकंसिद्धयति।

अस्यमासस्य चान्द्रसंज्ञानिमित्तं योगमाह—तिथिनाम्नीति—तिथि-नाम्नि प्रतिपदादि प्रातिपदिके या तिथौ प्रवृत्तिः साचान्द्रींकलामाप्य प्रवृत्तिनिमित्तीकृत्य निष्पद्यते। अतस्तिथिघटितमासश्चान्द्र इत्युच्यते। अयंभावः-अशीत्यधिक शतभागस्य चन्द्रमण्डलस्यद्वादशभागः कलेत्युच्यते, तस्याः कलायाः सूर्याधिष्ठितप्रदेशान्निर्गम एव तिथिशब्दवाच्यः। यतस्ति-थिशब्द प्रवृत्तिनिमित्ते चन्द्रकलाप्रविशत्यतस्तिथिघटित मासकुक्षावपि-चान्द्रस्य प्रवेशान्मासश्चान्द्र इतिव्यवह्रियते।

तदाह सूर्यसिद्धान्तः—"अर्काद्विनिसृतः प्राचीं यद्यत्यहरहः शशी।

मार्गेर्द्वादशभिस्तत्स्या स्तिथिश्चान्द्रमसंदिनम्। नाडीषष्ट्याद्वनाच्चत्र महोरात्रं प्रकीर्त्तितम्। तैस्त्रिंशता भवेन्मासः सावनोर्कोदयैस्तथा। ऐन्दवास्तिथिभिस्तद्वत्सक्रान्त्यासौर उच्यते" इति। अनेनैववाक्येन सौरसावननाक्षत्रमासा व्याख्याता। मलिम्लुच संज्ञा तु शुक्लादेश्चान्द्रमासस्यैव। तथाच लघुहारीतः—"इन्द्राग्नीयत्रहूयेते मासादिः सप्रकीर्त्तितः। अग्निषोमौ स्मृतौमध्ये समाप्तौपितृसोमकौ। तमतिक्रम्यतुरविर्यदागच्छेत्कदाचन। आद्येमलिम्लुचोज्ञेयोद्वितीयः प्राकृतः स्मृतः। तस्मिंस्तुप्रकृतेमासि श्राद्धकुर्याद्यथा विधि, तथैवाभ्युदयंकाम्यं नित्यं नैमित्तकन्तथा। प्रत्यब्दं द्वादशेमासि कार्यापिण्डक्रियाबुधैः। क्वचित्त्रयोदशेपिस्यादाद्यं मुक्त्वातु वत्सरम्।

शुक्लप्रतिपदादि अमावास्यान्तं मासम् अत्यन्तसंयोगे द्वितीया, अतिक्रम्य-असंक्रम्य गच्छेन्मासान्तरंप्राप्यराश्यन्तरं संक्रामेत्। आद्यः अतिक्रमणीयः द्वितीयः संक्रमणीयः तस्मिंस्त्वितितुकारेणासंक्रान्तमासे परिसंख्यालभ्यते तत्रैवच निर्भरो नतु प्रकृतमासेश्राद्धादिविधौ मानान्तरलभ्यत्वात् श्राद्धंमासादिपुरस्कारेणविहितम्, सम्भवत्कालान्तरकत्वादनावश्यकत्र्च—"रविणालंघितोमासश्चान्द्रः ख्यातोमलिम्लुचः। तत्रयद्विहितंकर्म उत्तरेमासिकारयेदिति।" नेहेतात्रविशेषेज्यामन्यत्रावश्यकाद्विधेरितिचस्मृतेः। अभ्युदयं विवाहादिनित्यंभाद्रपदस्याधिमासत्वे प्राप्तमाश्विनापरपक्षाष्टकादि नैमित्तकं द्वितीयादि साम्वत्सरिकं प्रत्यब्दम्, अब्दानामारम्भदिवसेषु पिण्डक्रिया साम्वत्सरिकम्, क्वचिन्मलमासवतिवर्षे आद्यमितिप्रथमाब्दे, यदिद्वादशोमासस्तदातत्रैवाब्दिकम्। नतु त्रयोदशेमासीत्यर्थः।

ननु यत्र द्वौमासावसंक्रान्तौ तत्र चतुर्दशमासघटितमपिवर्षंस्यात्। तथाच तत्र चतुर्दशेमासेआब्दिकं प्रसज्येत्। यथा—"व्यतीते शकवर्षेस्मिन् अङ्किते त्रिखगजभिः। मासद्वयमभूत्कन्यामीनभास्करलंघितम्" १६०३ आश्विनः

कन्यार्कलंघितश्चैत्रोमीनार्कलंघित इतिद्वौमासावधिमासौ तत्र चैत्र प्रमीतानां त्रयोदशेमासि प्रथमाब्दिकम्, चतुर्दशे द्वितीय द्याब्दिकमवर्जनीयमिति-चेन्न।

तत्राश्विनस्यवृद्धयभावाच्चैत्रमात्रस्यवृद्धया वर्षस्य चतुर्दशमासघटितत्वाभावात्। तदाह-भीमपराक्रमः-'त्रयोदशन्तुश्रुतिराहमासं चतुर्दशः क्वापि-नदृष्टपूर्वः। एकत्रमास द्वितयंयदिस्यादब्देऽधिकन्तत्रपरोऽधिमासः"। द्वादशमासास्सम्वत्सरः। अस्तित्रयोदशोमास इत्याहुरिति। श्रुत्यावर्षारम्भक-स्त्रयोदशोमासः पठितो न चतुर्दशइति। यत्र एकत्राब्दे मासद्वितयमधिकं-स्यात् अधिकलक्षणवत्वादधिकतयासम्भाव्येत तत्र परएवासंक्रान्तमासोऽधि-मासः। षष्ठिदिनपर्याप्तैकसंज्ञाकोऽधिकमासो नतुपूर्वः तस्य त्रिंशद्दिवसपर्य-वसित संज्ञकत्वादित्यर्थः। अधिकंस्यादितिवाक्ये, स्यादितिपदमप्तेद्धातो-स्तादात्म्यवाचिनो यदि लिङन्तंरूपं तदा धात्वर्थे प्रातिपदिकार्थस्य कुत्रचिद्भे-देन प्यन्वय स्वीकारादधिक प्रतियोगिक तादात्म्यवदेव मासद्वयं प्रतीयेत। तथासत्येकत्राब्दे चतुर्दसमासप्रसक्तिरवागितास्यादिति लिङन्तप्रतिरूपको-निपातस्सम्भावनामभिव्यनक्ति। दिगम्बराणां सप्तभङ्गीनामके स्याद्वादे-"स्यादस्ति" स्यान्नास्ति" स्यादनिवक्तव्य इत्यादौ दूरे देवदत्तोयंस्यादिति लौकिकप्रयोगेच तथादर्शनात्। सम्भावनाच संशययोग्यता सापि तत्सह-चरितधर्मरूपेत्याशयेन पूर्ववाक्य विवृत्तमाह, सएव-"यत्रैकस्मिन्नब्दे लक्ष्मैत-द्भवतिमासयोरुभयोः। तत्रोत्तरोऽधिमासः स्फुटगत्याभवतिचार्केन्द्वोः।" स्फुटेति, अधिमासोद्विविधः—चन्द्रार्कयोर्मध्यमगतिमानसिद्धः, स्फुटगति-मानसिद्धश्च, तत्राद्योज्यातिषप्रसिद्धोव्यवहारबाहर्भूतः, प्रतिनियतस्थितिः-द्वात्रिंशद्भिर्गतैर्मासैर्दिनैःषोडशभिस्तथा। चतसृभिर्घटीभिश्च पतत्येकोधि-मासक इत्यादिगणकगणनासिद्धः। द्वितीयस्तु-चन्द्रार्काभ्यां प्रत्येकघटिका

कर्षणेनस्फुटं गच्छद्भ्यांनिवर्त्तितः। तथाच—स्मृतिः।

"दिवसस्याहरत्यर्क पष्ठिभागश्चचन्द्रमाः।
एवंसार्द्ध तृतीयानाम् अब्दानामधिमासकम्।
"ग्रीष्मेजनयतः पूर्वं पञ्चाब्दान्तेतुपश्चिमम।"

ननु पञ्चदशभिः ऋतुभिरधिमासपातइतिन युज्यते, तृतीयवर्षप्रथमार्द्धे कार्त्तिकादिपञ्चकपाते कालवृद्धेरपिदर्शनात्, अतआह—ग्रीष्मइति। तौ पुष्पवन्तौ पञ्चाब्दाभ्यन्तरे द्वौ मलमासौ जनयतः तयोःपूर्वंयदि ग्रीष्मेज्येष्ठाषाढ़योर्ज्जनयतः तदापञ्चाब्दानतीत्य ग्रीष्मस्यपश्चाद्वसन्तेभवमधिमासं जनयतः ज्येष्ठेयदि प्रथमोमलमासस्तदा चैत्रे द्वितीयःआषाढ़े यदिप्रथमो मलमासस्तदा वैशाखे द्वितीयः, तेन तृतीयवर्षस्य कार्तिकादिपञ्चकमपहाय गणनया षष्ठमासो मलमासइत्यर्थः।

एतन्मूलक मेव "सम्वत्सरद्वयेऽतीतेवर्जितो यदि पञ्चकः। षष्ठोमासोधिमासस्यात् स्त्रीबालैरपिगण्यता" मितिपरमानन्द ठक्कुरवचनम्। इदन्तुकस्याश्चिदयनस्थितौ। सम्वाद्यपि न नियतम्। अस्मिन्नवैक त्रिंशदधिक षोड़श शतोङ्किते १६३१ तीतशककाले वैशाखोमलमासः। पूर्वन्तु तृतीयवर्षे ज्येष्ठोमलमासोऽभूत। माधवीयकालादर्शे इन्दुप्रणयनबर्षे फाल्गुनो मलमासोलिखितः—'दशानां फाल्गुनादीनां प्रायोमाघस्यचक्कचित्। "नपुंसकत्वं भवति नतु पौषस्य कुत्रचित्" इतिस्मृतिरपि पौषातिरिक्तेषु सर्वेषु मासेषु नपुंसकत्वसम्भवमाह नपुंसकत्व संक्रान्तिसंयोगविरहः।

यतु "सुखशिखिशरभूशकोत्रवर्षइति" स्वकीयं शास्त्राब्दं परिभाष्य—"अब्देगोभूमिभिस्तुष्टे चैत्रादिस्यान्मलिम्लुचः। क्रमान्मेघत्तुशक्राग्निशिवशून्यवसुस्थिता "वितितैरभिहितम्। तदधुनापि सम्वदत्येव

सम्प्रतिहिशकाब्दा एकत्रिंशदधिकाषोड़श शती १६३१ शास्त्राब्दा एका-धिकंशतम १०१ तस्मिन्नेकोन विंशत्या १६ तष्टे शेषस्रयोदश। तेन वैशाखोमलमासइति। तस्मात्कथितवर्षे स्फुटमानसिद्धोवृद्धिमान्मासश्चैत्र एव नत्वाश्विनः।

ननु वृद्धिर्नामाव्यवहित पौर्वापर्यापन्नमासयोरेकसंज्ञकत्वम्। तत्र-च संज्ञाप्रवृत्ति निमित्तस्य मासद्वयसाधारण्यंनिमित्तम्। आश्विनपदप्रवृ-त्तिनिमित्तन्तु, कन्यार्कारब्धमासत्वम्। तच्चाग्रिमे तुलासंक्रान्तिमतिमासे-पि वर्त्ततइति दुर्वारस्तत्राश्विनसंज्ञाप्रसरः। भीमपराक्रमस्तु-असंक्रान्तमास-योर्मध्येपूर्वस्य कर्मण्यत्वं प्रतिप्रसौति नतु वृद्धिनिषेधति, परोऽधिमासइतिपरएवा-कर्मण्यो नपूर्व इत्यर्थः। त्रयोदशन्तुश्रुतिराहेतु पूर्वार्द्धस्य एकत्वमासद्वितय-स्यादिनोत्तरार्द्धेनसह नोपोद्बुधात्सङ्गतिः। किन्तु भिन्नमेवेदंवाक्यद्वयम्, चतुर्दशमास प्रसक्तिस्तु मध्ये चयाख्यमासस्यलोपाङ्गीकारेणैव निराकर-णीया। प्रकृतेहि, तुलासंक्रान्तिमान्मास आश्विनएव, कन्यादित्यारब्ध-त्वात्, वृश्चिकसंक्रान्तिमान्मासः कार्त्तिकः तदन्तरो धनुमकरोभय संक्रान्ति-मान्मासोमार्गः वृश्चिकादित्यारब्धत्वात् धनुरादित्यारब्धोमासस्तु न लभ्य-त इति तस्यलोपएव।

अतएव तस्य चयाख्यापि द्विसंक्रान्तमासस्योपपद्यते। यदाह भा-स्कराचार्यः—"असंक्रान्तमासोऽधिमासः स्फुटः स्याद्विद्विसंक्रान्ति मासः चयाख्यः कदाचित्। चयः कार्त्तिकादित्रयेनान्यतः स्यात्तदावर्षमध्येऽधि मासद्वयञ्च"। स्फुटः स्फुटमानसिद्धः, चयः—चयसंज्ञाकार्त्तिकादित्रय एवस्यात्। अथवा—चयो लोपः कार्त्तिकादित्रयप्रतियोगिक एव स्या दित्यर्थः।

तेन यत्र तुलावृश्चिकसंक्रान्तिमाने क्षोमासस्तत्र पौषस्यलोपइत्यर्थः। एतेन क्षयसंज्ञा कार्त्तिके पौषेच नोपपद्यते, तुलावृश्चिकसंक्रान्तिमतोमासस्य कन्यादित्यारब्धत्वेनाश्विनत्वात्। धनुर्मकरसंक्रान्तिमतोमासस्य वृश्चिका-दित्यारब्धत्वेन मार्गशीर्षत्वात्, मकरसंक्रान्तिमतिमासे कुम्भसंक्रमणं न सम्भवत्येव। सिद्धान्तसिरोमणिटीकायां मिताक्षरायां भास्करकृताया-मेवप्रतिपिद्धत्वात्।

तुलावृश्चिकसक्रान्ति मत्याश्विनेपि क्षयसंज्ञासत्वेमनान्यत इत्यनुप-पन्नमित्यादि समाहितम्। कार्त्तिकादित्रये इत्यत्र सप्तम्याः प्रतियोगित्वा-र्थकत्वात्, क्षयपदस्यच लोपार्थकत्वात्तदेतिक्षयमासवतोवर्षस्य मध्ये क्षय-मासात्पूर्वोत्तरावधिमासौ भवतइत्यर्थः।

तस्मात्तत्रवर्षे आश्विन चैत्रयोर्द्वयोरपिवृद्धिः। पौषस्यलोपइति-येत्, उच्यते—"मीनादिस्थे रवौमेषा मारम्भः प्रथमेक्षणे। तेब्दे चान्द्र-मसामासाश्चैत्राद्याद्वादशास्मृता" इति चैत्रादिलक्षणं तावदनुपपन्नम्। चैत्र एवाव्याप्तेः।

चैत्रेमासि जगद्ब्रह्मा ससर्ज प्रथमेऽहनि, ग्रहान् मासानृतून् पश्चा-न्वासरान्वासराधिपानि" ति संहिता वाक्येन मेषराशौ चैत्र प्रतिपदि सर्व-ग्रहाणां सृष्टयभ्युपगमात्। सूर्योद्वादशांशान्तरितस्यैवचन्द्रस्य सृष्टया प्रतिपत्तिथेरुपपत्तेः।

ननु चैत्रादिपदं नानार्थमाद्यचैत्रमेषरविसंक्रान्तिमन्मासत्वमादाय-प्रवर्त्तते, मेषगरविसंक्रान्तिः शशिमासेभवति यत्र तच्चैत्रम्। एवं वैशाखा-द्यां वृषादिसंक्रान्तियोगेनेतिस्मरणात्। सृष्टस्य रवेः प्राथमिकमवयव संयोगजन्यं संयोगमादाय तत्र मेषसंक्रान्तिव्यवहारादितिचेत्, न अस्यापि

लक्षणस्य मलचैत्र एवाव्याप्तेः। मलमासोद्वादशेभ्यो मासेभ्यो भिन्न एवेतिचेन्न, तत्र क्रियमाणे प्रथमाब्दिके मासोल्लेखानुपपत्तेः।

एतेन—'मेषादिस्थे सवितरि योयोमासः—प्रपूर्यतेचान्द्रः। चैत्रादिः सज्ञेयः पूर्त्तिर्द्वित्वेऽधिमासोऽन्त्य" इति वाक्यानुसारिमेषादित्य पूर्णमासत्वं कन्यादि मलमासाद्यनुगतलक्षणमप्यसाम्प्रतम्।

मेषादित्यलंघितस्यास्य मासस्य चैत्रोल्लेखविषयताापत्तेः। तथाच परुद्वैशाखशुक्लपक्षमृतस्यास्मिन्नाब्दिके क्रियमाणे मासोल्लेखवैषम्यंस्यात्। नच—"मलमासेपि कर्त्तव्यमाब्दिकं प्रथमंबुधैरिति" वाक्यं परुच्चैत्रमृतस्यैषमो मेषादित्यलंधितेमासि प्रथमाब्दिकंविद्यत इत्यपियुज्यते। आद्यं मुक्त्वातुवत्सरमित्यनेन" त्रयोदशेमासि प्रथमाब्दिकपरिसंख्यानात्।

किञ्च मलमासस्य पूर्वमासान्तर्भावे—"षष्ठ्यातुदिवसैर्मासः कथितोवादरायणैः। पूर्वार्द्धन्तु परित्यज्य उत्तरार्द्धे क्रियाभवेदिति आद्यो-मलिम्लुचोज्ञेयो द्वितीयः प्राकृतः स्मृत इत्यादे" मलमासानामुत्तरमासैकदेशत्व ग्राहकस्य शास्त्रस्य व्याकोपः।

ननु अतएवहेतोर्मीनादित्यारब्धमासवाचकमेव चैत्रादिपद कर्मारम्भे कर्मंमुल्लेख्यमस्माभिरभ्युपेयते। कल्पादिचैत्रस्तु कर्मत्रहिभूतं इति तेदसंग्रहो नदोषाय।

अतएव कर्मांगपौषपदप्रयोगविषयमासालाभात् धनु मकर संक्रान्तिमतिमासे पौषस्य क्षयो व्यपदिश्यते। स्त्रीक्रियतेच तत्रपौषाधिकारविहितकर्मणांलोपः। पौषेप्रमीतानामाब्दिकलोपश्च क्षयाहालाभात्। "मास पक्ष तिथि स्पृष्टे यो यस्मिन्म्रियतेऽहनि। प्रत्यब्दन्तु तथाभूतं क्षया-

हन्तस्यतद्विदुः" इतिवचनसिद्धः क्षयाहेहि पक्षतिथ्योरिव मासस्यापि व्यतिरेकेणोपपद्यतइतिचेत्, न, ।

एवंसति मीनादित्यविशिष्टकालस्यलघोश्चैत्रादि पदवाच्यस्यसम्भवे मीनादित्यारब्ध चान्द्रमासस्य गुणैस्तथात्वानुपपत्तेः । सौरमासस्य तदुल्लेखस्यैवच कर्माङ्गत्वापत्तेः । अथ—"चक्रवत्परिवर्त्तेत कालःसूर्यवशाद्यतः । अतस्साम्वत्सरंश्राद्धं कर्त्तव्यं मासचिह्नितम् । मासचिह्नन्तुकर्त्तव्यं पौषमाघाद्यमेवहि । यतस्तत्र विधानेन मासस्स परिकीर्त्तितः" इति लघुहारीत वचनन्तस्यार्थः ।

यतः सूर्यवशात् कालः सौरोमासश्चक्रवदनियमेन परिवर्त्तमानः क्षयाहंव्यभिचरति । अतः सौरमासमपहाय प्रत्यब्दकर्त्तव्यतया विहितमाब्दिकश्राद्धं मासचिह्नितं मासोल्लेखाङ्ककं कर्त्तव्यम् । मासोल्लेखस्य सौरसाधारण्यमाशंक्याह—मासचिह्नमिति । मासचिह्नितं मासपदसामानाधिकरण्येन प्रयोज्यम् । पौषमाघाद्यपदं पौषादिपदमपि सौरे प्रयुज्यतइत्यत आह—यत्रइति । यत्रचान्द्रमासे विधानेन व्याकरणानुशिष्टतया सएवमासश्चान्द्रो माघादिपदेनकीर्त्तितः—शक्त्याऽभिहितो भवति । नतु सौरादिरतो मुख्यंमाघादिपद मुल्लिख्यैव श्राद्धं कर्त्तव्यमिति ।

तथाच क्षयाहव्यभिचारितया वार्षिके सौरमासोनोल्लेख्य इतिचेदेवंसति चान्द्रमासलोपाभ्युपगमे तस्यापि क्षयाहव्यभिचारितया "प्रत्यब्दमितरे कुर्यु रेकोद्दिष्टंसुतादशेति प्रत्यब्दं द्वादशेमासि कार्यापिण्डक्रियाबुधैरिति। "प्रत्यब्दन्तु तथाभूतं क्षयाहन्तस्यतद्विदुः ।" इतिबहुवाक्य व्याकोपप्रसङ्गाच्चान्द्रोपिमासो न परिगृह्येत । आब्दिकलोपप्रसङ्गस्य सौरपरिग्रहे वाधकस्य चान्द्रमासेपि जागरुकत्वात् ।

अथ चान्द्रमास परिग्रहपक्षे न कस्यचित्कर्मणो नवा मासोल्लेखस्य व्याकोपः। तथाहि—यत्र शुक्लद्वितीयायां धनुषि कृष्णचतुर्दश्यां मकरे रविसंक्रान्तिस्तत्रक्षयमासे मकरसंक्रन्तिमन्मासत्वं मकरादित्य पर्यवसितमासत्वञ्च द्वे पौषपद प्रवृत्तिनिमित्त वृश्चिकादित्यारब्धमासत्वं धनुस्संक्रान्तिमन्मासत्वञ्चेति द्वे मार्गशब्द प्रवृत्तिनिमित्तेविद्येते। तथाच—मासयोस्संकरएवक्षयो नतु कस्यापिलोपइति माघपदेन पौषपदेन वोल्लिख्य-मार्गमृतानां पौषमृतानामाब्दिकं क्षयमासे कर्त्तव्यम्।

यत्तु—व्याघ्रपादस्य व्यवस्थावचनम्। "तिथ्यर्धे प्रथमे पूर्वो-द्वितीयेर्द्धेतः परः। मासाविति बुधैश्चिन्त्यौ क्षयमासस्य मध्यगा" विति। तथापि क्षयमासघटकतिथिपूर्वार्द्धे पूर्वमासकृत्यम्। तदुत्तरार्द्धेतूत्तरमासकृत्यं कर्त्तव्यमितिनार्थः।

तिथ्युत्तरार्द्धस्य निपाते तदाब्दिकलोपापत्तेः। किन्तु तत्तन्मास पुरस्कारेण कर्मणिक्रियमाणे यथासंख्यं तिथिपूर्वोत्तरार्द्धयोश्चिन्तन मङ्गत्वेनविधीयत इतिचेत् अत्रोच्यते—व्याघ्रपादवचनम्, स्वतन्त्रतया क्षयमासस्य मासद्वयारम्भकतिथित्वेन चिन्तनरुपामुपासनांविधत्ते। नतु संज्ञाद्वयसमावेशं बुधैश्चिन्त्याविस्त्येव स्मरणात्। क्षयमासाधिकरणककर्माङ्गमुपासनाविशेषम्वा विधत्ते—"बृहतिस्तूयमानेसमुद्रं मनसाध्यायेद्रथन्तरे पृथिवी" मितिवत्।

माघादि संज्ञाद्वयन्तु नैकत्रकाले समाविशति "सास्मिन्पौर्णमासीति संज्ञायामि" ति पाणिनीय संज्ञाग्रहणसामर्थ्यात्, संज्ञायामित्यनेनैतदुक्तं भवति, यथा अपादान सम्प्रदान संज्ञाद्वयमेकत्रनाभिनिविशते। किन्तु परा निरवकाशाच पूर्वां सावकाशांवाधते, तथा निरवकाशा, पराच क्षयमासे

पौषसंज्ञा, पूर्वा मार्गसंज्ञां बाधित्वा मकरसंक्रमणवन्मासस्त्र पुष्ययुक्तपौर्णमासीकमासत्वेनप्रवर्त्तमानो मार्गसंज्ञा कार्त्तिकसंज्ञांबाधते, तुला संक्रान्तिमति मासे तु कृत्तिकायुक्तपौर्णमासीकत्वेन प्रवर्त्तमाना कार्त्तिकसंज्ञाकन्यादित्यारब्ध मासत्वाद्यवच्छिन्न प्रवृत्तिकामाश्विन संज्ञांबाधते, कन्यादित्यलंघिते मास्याश्विनसंज्ञा तु प्रतिपत्तराहित्यान्न कस्यापि बाध्या बाधिकावेति, भवतु वा पूर्त्तिद्वित्वेऽधिमासोऽन्त्य इत्यनेनप्रवर्त्तकाया भाद्रसंज्ञाया बाधिकेतिनाश्विनस्य। अत्रवृद्धिर्न्नत्रा पौषस्यलोपः।

नहि कुत्रापि धर्मशास्त्रे पूर्वापरयोः कर्मण्ययो र्वाश्विनयोः कर्मव्यवस्थाऽभिहिता। नत्रा क्षयमासे कर्मणामकरणं व्यवस्थावा प्रतिपादिता, क्षयसंज्ञा तु क्षीयन्ते क्षत्रिया अस्मिन्निितियोगेनप्रवर्त्तते। तथाचस्मर्यते—"यान्तिथिं" समनुप्राप्य तुनांगच्छतिभास्करः तयैवसर्वसंक्रान्तिर्मेषं यावन्नगच्छति। यदाक्रमति चाराभ्यां सूर्यसंक्रमणं भवेत्। क्षत्रियाणामसृग्धारान्तदापिवतिमेदिनी" अतएव क्षयः कार्त्तिकादित्रयेनान्यतः स्यादित्युपपद्यते।

अन्यथा तुलावृश्चिक संक्रान्तिमान् क्षयमासस्सआश्विनेपिस्यात् क्षयोलोपइत्यादिः सजातीयकालान्तरे कालस्थानुप्रवेशविषयापरिभाषा सावनदिनप्रविष्टे चान्द्रदिने तिथिक्षयइति। बार्हस्पत्यवर्षप्रविष्टे चान्द्रवर्षे वत्सरलोप इति व्यवहारात् "गुरोर्मध्यमसंक्रान्तिहीनोयश्चान्द्रवत्सरः, लुप्तसम्वत्सरोज्ञेयो गर्हिते मलमासवदि" ति स्मृतेः। तथाच—द्विसंक्रान्तमासे सौरकार्त्तिकादेरन्तर्भावान्मासक्षय इतिपरिभाषा। भास्करवाक्येतु सप्तमी-षष्ठ्यर्था, तेन कार्तिकादावेव सौरमासस्य क्षयो नान्यस्येत्यर्थः। अधिमासद्वयश्चेत्यसंक्रान्तमासद्वयश्चेत्यर्थः। स्वयमेवासंक्रान्तमासोऽधिमास इति परिभाषणात्।

एतेनाधिमासद्वयश्चेत्यभिधानाद्द्वयोर्वृद्धिरित्यपास्तम्‌ लक्ष्मैतद्भवति मासयोर्गतिभीमप्राक्रमेलक्ष्ममात्रस्यैवाभिधानाच्च ।

वस्तुतस्तु, धनुरादित्यारब्धमासत्वादीनि पौषपदार्थानां सम्भवमादाय व्यावर्त्तकानि । नतु प्रवृत्तनिमित्तानि योगेनैव पौषादिप्रयोगसंभवे शक्त्यन्तर कल्पनायां मानाभावात्‌ । योगस्तु नामलिङ्गानु शासने, पाणिन ये च त्रेधा प्रतिपादितः । तथाहि—

"पुष्ययुक्तापौर्णमासी पौषीमासेतुयत्रसा । नाम्ना स पौषोमाघाद्य श्चैवमेकादशेपर" इत्यमरः । अत्र पुष्यपदं पुष्यसदेशचन्द्रपरम्‌, तद्विशिष्टायां पौर्णमास्यां पौषीपदस्य निरूढ़िः । पौर्णमासीपदेन तु चन्द्रपूत्तिरधिकरणंतिथिरुच्यत इत्येके । तन्मते चान्द्रोनादन्तमासशब्द प्रतिपाद्यः । अदन्ताच्च पूर्णिमासशब्दादणं पाणिनिर्विदधातीति चिन्त्यम्‌ ।

पूर्णोमासोऽस्यामितिविग्रहान्मासपूर्त्तेरधिकरणंतिथिः पूर्णमासी पदार्थः । पूर्तिश्चरमक्षणइत्यपरे । तथाविधापौषी यत्र मासे स मासः पौष इतिसकलचान्द्रसाधारणः । पौषप्रातिपदिकस्ययोगोऽमराभिमतः । पाणिनिसूत्राच्च पुष्ययुक्तपञ्चदश्यां पूर्णःकृष्णादमास एव पौषशब्दार्थ इति प्रतिपादितम्प्राक। युज्यते च कृष्णादिरेवमासस्य साम्वत्सरिकादिषु तिथिकृत्येषूल्लेखः । पाणिनीयविधानस्य लघुदारीतेन मासविशेषपरिग्रह निमित्तत्वेनोक्तत्वात्‌ ।

अथ कृष्णादिमासस्यैव साम्वत्सरिकाङ्गत्वे परुत्कृष्णादि ज्येष्ठकृष्णपक्षेमृतस्य किमेषमो द्वितीय वैशाखकृष्णपक्ष मलमासेश्राद्ध माहोस्वित्‌ द्वितीय वैशाखीसमनन्तरकृष्णपक्षे । नप्रथमः, तत्र ज्येष्ठपदोल्लेखस्य कथमप्यसङ्गतेः । न द्वितीयः । "क्वचित्‌ त्रयोदशेपिस्यादाद्य मुक्त्वातुवत्सरमितिवचनव्याकोपात्‌ ।

तत्रहि—'प्रत्यब्द द्वादशेमासि कार्यीपिण्डक्रियेत्युत्सर्गः। मलमासवतिवर्षे क्वचित्त्रयोदशेपिस्यादित्युत्सर्गापवादः। यत्र प्रथमवर्षे द्वादशोमासो मलिम्लुचस्तत्र द्वादशे मासिपूर्णे प्रथमाब्दिकं नतु, त्रयोदशे मासीति प्रतिप्रसवः।

अतएव—आद्येवत्सरे यदा द्वादशएवमासो मलिम्लुचस्तदा तत्रैव प्रथमाब्दिकमिति व्याख्यातारो व्याचक्षते। व्याख्यावचने च द्वादशोमासो मलिम्लुच इत्यस्य द्वादशमासिकादिवसाभिव्यापको मलिम्लुच इत्यर्थः। अन्यथा परुज्ज्येष्ठ शुक्लप्रतिपन्मृतस्यैषमो द्वादशमासस्य मलमासस्वरूपत्वो त्तदन्ते शुद्धं वैशाखशुक्लप्रतिपदिप्रथमसाम्वत्सरिकप्रसङ्गात् तत्रज्येष्ठोल्लेखो-दुरुपपादः।

अपिच कृष्णादिमासस्य साम्वत्सरिकाङ्गत्वे साम्प्रतं मलवैशाख कृष्णपक्षे मृतस्यागामिवर्षे चैत्रसमनन्तर कृष्णपक्षेश्राद्धंस्यात्। वैशाखी समनन्तर कृष्णपक्षे कृष्णादि वैशाखोल्लेखासम्भवात्। तथाच—"सम्वत्सराभ्यन्तरे यद्यधिमासपातः स्यात्तदामासिकार्थं दिनमेकंवर्द्धयेदिति" विष्णुसूत्र व्याकोपः। अत्रहि सूत्रे न दिनवृद्धिर्विधीयते। किन्तु मासिकवृद्धिः। तेन त्रयोदशमासपूर्तौ त्रयोदशंमासिकं प्रथमाद्विकं सपिण्डनञ्च-कर्त्तव्यमित्यायाति। सम्वत्सराभ्यन्तर, इत्यस्य एकादशमासाभ्यन्तर इत्यर्थः। द्वादशमासस्य मलमासत्वे द्वादशमासिपूर्णे सपिण्डाद्विकयोरा-द्यमुक्तवातुवत्सरमित्येतद्वाक्य प्राप्तत्वादिति व्याख्यातारः। तत्रापि व्याख्यानवाक्ये एकादशमासाभ्यन्तर इतयस्यैकादशमासिक दिवसाभ्यन्तर इत्यर्थः।

अन्यथा—परुज्ज्येष्ठ शुक्ल प्रतिपदिमृतस्यैषमो द्वितीय वैशाख-

शुक्ल प्रतिपदि वार्षिकाचरणप्रसङ्गा देकादशमासस्य मलमासात्पूर्वस्याऽमा-वास्ययैव पूर्त्तेरेवञ्चोल्लेखः सर्वथानुत्पन्नस्यादिति न कृष्णादिर्मासः साम्व-त्सरिकाङ्गम्, किन्तु शुक्लादिः। तथाच परुज्ज्येष्ठकृष्णपक्षस्यापि शुक्लादि वैशाखान्तर्गतत्वेन तत्र मृतस्यैषमो मलमासकृष्णपक्षे प्रथमाब्दिक करणेपि नोल्लेखव्याकोपो नवा ऐषमो मलमासकृष्णपक्ष मृतस्यागामिनि-वर्षे वैशाखी समनन्तरपक्षे प्रथमाब्दिककरणे किमपि व्याकुप्यते। कृष्णादि-ज्येष्ठकृष्णपक्षस्य शुक्लादि वैशाखान्तर्गतत्वेनोल्लेखासङ्गतेरभावादिति।

सर्वत्रैव च कर्मणि शुक्लादिमासोल्लेख एव शास्त्रार्थः। अतएव पुष्ययुक्ता पौर्णमासीकत्वस्य योगार्थस्यातिप्रसक्त्या धनुरादित्यावच्छिन्न प्रथम प्रतिपत्कः पौषइति निवन्धकारा एकवाक्यतया वर्णयन्ति। साच प्रथमा प्रतिपच्छुक्लैव नतुकृष्णा, तस्य धनुरादित्य व्यभिचारादिति।

अत्रोच्यते—"चक्रवत्परिवर्त्तेतिवाक्येन प्रत्यब्दं क्षयाद्यालाभप्रसङ्ग भीत्या यथा सौरस्य मासस्य लघोरपि साम्वत्सरिकश्राद्धेऽनुल्लेख्यत्वं प्रति-पादयताऽर्थतो धनुरादित्यारब्धमासस्यापि परित्यागोऽभिहितोभवति हेतु-साम्यात्, क्षयमासवति पूर्वोक्तवर्षे धनुरादित्यारब्धमासालाभात्। तत्र मकरादित्यपरिसमाप्तमासत्वेन पौषपदं प्रवर्त्तत इतिचेत्, तर्हि तत्र चैत्रेष्य-संक्रान्ति फाल्गुनशब्दः प्रवर्त्तेत।

ननु तत्र फाल्गुन सञ्ज्ञा पूर्वस्मिन्मासे सावकाशेति प्रथमाब्दिके कर्त्तव्ये निरवकाशा चैत्रसंज्ञा तांवाधत इतिचेद्गाढम्। एवंसति, कोष व्याकरणसिद्धं योगमादाय पौषादिसंज्ञा कुतोनप्रवर्त्तते, किं रूढ़िस्वीकारेण।

तथाहि—सन्तितावन्नक्षत्रगोले द्वादशभागाः भाद्रपदाप्रधानकाऽश्विनी प्रधानकः कृत्तिकाप्रधानकश्चेत्यादिः। तथाच पञ्चालानां निवासे जनपदे

पञ्चोला इति शब्दः प्रयुज्यते, तथाऽश्विन्यानिवासेदेशेऽश्विनीशब्दः । तत्राज प्रत्ययान्तो गौणवृत्त्या वा प्रयुक्तः । पूर्णशब्दसम्बन्धे पूर्णमासकत्वमवबोधयंस्तथाविधां पौर्णमासीं तद्धितसामर्थ्यादवगमयति । अतएव पुष्ययुक्तापौर्णमासी पौषीत्यमरः । द्वितीयाणप्रत्ययान्त आश्विनाद शब्दो योगादेवाश्विनी पर्यवसितमाश्विनीमन्तम्बो मासंप्रतिपादयति । यत्रच भाद्रपदास्वामिकोऽश्विनी स्वामिकश्च देशस्संकीर्णः जनपदयोस्सीमभूमिवत् तदधिष्ठितेन चन्द्रेणचमासः स तत्र भाद्राश्विनशब्दयोर्योगेन प्रयोगसम्भवेपि परतया निरवकाशत्वेनच बलवतीसञ्ज्ञेतरांबाधते, बाध्यप्रयोगस्य याज्ञ्येकर्मणिप्रयोगानर्हत्व लक्षणमसाधुत्वं ज्ञापयतीतियावत् ।

इदमेव च सास्मिन्पौर्णमासीतिसंज्ञायामितिसूत्रे संज्ञाग्रहणप्रयोजनम् असौहिशाब्दिकानांसिद्धान्तः । अपादानादिसंज्ञा, क्रियाजन्यविभागवत्त्वादिना निमित्तेन प्रवर्त्तते, तच्च निमित्तं कर्तृसाधारणमपि न कर्त्तरि–अपादानसञ्ज्ञाकार्यं पञ्चम्यादिजनयति । परयासंज्ञयाबाधात्, पञ्चम्या असाधुत्वज्ञापनात् ।

तथाच वृक्षात्पततीतिवत्, स्वस्मात्पततीति प्रयोगो न साधुरितिसिद्ध्यति । तथाचासंक्रान्ताश्विने भाद्रपद लक्षणसत्वेप्याश्विनपद प्रयोग एव साधुर्न्नभाद्रपद प्रयोग इति ज्यौतिषधर्मशास्त्रादिभिर्व्यवस्थाप्यते । असावाश्विनो न भाद्रपद इत्यादयः प्रयोगाः कथमितिचेत्, तत्र वैयाकरणाः प्रष्टव्या येकर्त्रादि व्यावर्त्तकं पञ्चम्यादिप्रतिपाद्यं नाभ्युपगच्छन्ति अभ्युपगच्छन्ति तु वृक्षात्पतति पर्णं न पर्णादित्यादिकं प्रयोगम् ।

अथनञसमभिव्याहृत पञ्चम्या निःक्रियत्वेसति क्रियाजन्यविभागवत्वे लक्षणेतिचेत्, भवतु तर्हि नञसमभिव्याहृतस्य भाद्रपदपदादेः सिंहादि-

त्यारम्भमासादौ लक्षणा। यज्ञेकर्मणि तु यौगिकएव प्रयोगःसाधुः। तत्र यदि मघायुक्त पञ्चदश्यां पूर्णोमासएव माघादिपदस्य योगार्थस्तदा कृष्णादिरेव मासस्सर्वत्र कर्मण्युल्लेख्यः। शिष्टाहि, दानादावपि कृष्णादिरेव मासमुल्लिखन्ति।

यदिच—मघायुक्त पौर्णमासीघटित चान्द्रमाससामान्ये माघपदस्ययोग स्तदापितृकृत्ये कृष्णादिरेव, माघःकर्माङ्गत्वेनोल्लेख्यः। "आब्दिके पितृकृत्येच मासश्चान्द्र मसस्मृत इति। पार्वणोत्वष्टकाश्राद्धे चान्द्रमिष्टं तथाब्दिके इतिवाक्येऽष्टकासाहचर्येणाब्दिकादपि कृष्णादिरेवाङ्ग मित्यवगमात्। तस्मात्पूर्ववर्षे कृष्णादि ज्येष्ठकृष्णपक्षे मृतस्यैषमोपि ज्येष्ठकृष्णपक्ष एवश्राद्धम्, नतु मलमासकृष्णपक्षे, सम्वत्सराभ्यन्तरे यद्यधिमासपातः स्यात्तदा मासिकार्थं दिनमेकं वर्द्धयेदिति विष्णुसूत्रानुसारेण मासिकवृद्धौ सपिण्डनाब्दिकयो रुत्कर्षस्यार्थसिद्धत्वात् सम्वत्सरपदस्यैकादशमासिकदिवसावधिकालोपलक्षकत्वे प्रमाणाभावात्सावन चान्द्रसम्वत्सर वाचकत्वेनैवनिर्वाहात्।

अथैवं 'मलमासेपिकर्त्तव्यमाब्दिके प्रथमंबुधैः। तथैवमासिकंश्राद्धं सापिण्डीकरणन्तथे" ति, क्वचित्त्रयोदशेपिस्यादाद्यं मुक्त्वातुवत्सरमिति वचनं निर्विषयमापद्यतेतिचेत् न परुद्वैशाखशुक्लप्रतिपन्मृतस्यास्मिन्मलमास प्रथमतिथौ साम्वत्सरिकप्रविप्रसवत्वे नोपयोगसम्भवात्। अमावास्यायामेव सम्वत्सरपूर्त्तेश्च।

नचैव मैषमोद्वितीय वैशाखकृष्णपक्षमृतस्यापरीमवर्षे ज्येष्ठकृष्णप्रथमाब्दिकंप्रसज्येतेत्युल्लेखासङ्गति तादवस्थ्यमितिवाच्यम्। कृष्णपक्षमृतस्य सम्वत्सराभ्यन्तरेऽधिमास पाताभावात्।

अधिमासलक्षणघटकस्य मासस्यहिलघुहारीतेन त्रीणिचिह्नान्यभिहितानि शुक्लप्रतिपदारब्धकत्वं पौर्णमासीमध्यत्वममावास्यान्तरत्वञ्चेति, तत्राव्या र्चकस्यापि मध्यचिह्नस्याभिधानप्रयोजनमिदमेव। यन्मध्यम' चिह्न सम्बन्धे सत्येवाधि माससम्बन्धोऽव्यवहरणीयो न पूर्वापरचिह्नसम्बन्धमात्रेण।

एवञ्च, मलमासकृष्णपक्षमृतानान्नमासिकवृद्धि र्न्नैवा पूर्ववैशाख शुक्लपक्षमृतानां मलमासमध्यमचिह्नेन पौर्णमासान्त्यक्षण प्रतिपदाद्यक्षणोभयघटितत्वेनसह प्रथमसम्वत्सरस्य सम्वत्सराभावात्। विष्णुसूत्रेप्याधिमासस्यचिह्नं पूर्वसन्धिरेवाधि मासपातशब्देनोच्यते।

अन्यथा पातपदोपादानवैयर्थ्यप्रसङ्गा देवञ्च शुक्लपक्षस्य मृतानां द्वादशेमलमासे द्वितीयादावपि प्रथमाब्दिक मुपपादितं भवति। परेतु मासपदस्य शक्तिर्न्नासत्यपुष्पवन्तादिपदवद्व्यासज्ज्यधर्मावच्छिन्ना सुतरामधिमासपदस्य—"पक्षौपूर्वापरौशुक्लकृष्णौमासस्तुताबुभौ" इत्यभिधानकोषेण पूर्वपक्षत्वापरपक्षत्व समानाधिकरणो भयत्वावच्छिन्नेमासपदशक्तिग्रहणादेवञ्च सम्वत्सराभ्यन्तरेऽधिमास सम्बन्धस्तदैवसम्भवति, यदि पूर्वपक्षस्यान्तोऽपरपक्षस्यादिश्च तत्र सम्बध्यतेऽतोमलमास कृष्णपक्षमृतानां न मासिकवृद्धिरित्याहुः। तत्र "पक्षस्तेदशपञ्चचे" त्यभिधानादेकतरतिथ्यसम्बन्धे पक्षसम्बन्धोनस्यादिति।

पूर्णिमामृतानां मासिकवृद्धिर्नस्यादितिचिन्त्यम्। यदपि मलमासशुक्लपक्षमृतस्य पत्युरग्रिम वैशाखशुक्लपक्षे मलमासकृष्णपक्ष मृतायाः पत्न्या अग्रिम वैशाखकृष्णपक्षेसपिण्डनं नस्यादिति प्रथममृतस्य चरमं सपिण्डनम् इतिकाल वैषम्यंस्यात्। तथाविधस्थले पत्न्या नक्षत्रादिभि-

स्सपिण्डनं प्रमितभर्तृकत्वात्। नापि पत्यादिभिः पत्युरसपिण्डतत्वा-दिति कृष्णादिमासपरिग्रहे बाधकम्।

तदपि न शास्त्रीयस्य चरमस्यतस्यप्रथमं प्रथमस्य तस्य चरमंसपिण्ड-नमितिकालवैषम्यस्य दोषत्वे प्रमाणाभावात्। एवंविधस्थले, पत्युद्वार्द-शाहादौ सपिण्डनंविधाय संस्कृतेन भर्त्रासहैव पत्न्यास्सपिण्डनमित्यभ्यु-पगमात्।

असंस्कृतेनापि भर्त्रासह पत्न्याः सपिण्डनसम्भवात्। असपिण्डि-तेन पितामहेनसह पितुरिवासंस्कृतेन पित्रासह मातुस्सपिण्डनस्यापि न्याय-सिद्धत्वात्। "असंस्कृतौन संस्कार्यौ पूर्वौपौत्रप्रपौत्रकैः पितरन्तत्रसंस्कुर्यादि" ति श्राद्धविनिश्चय इतिवचने पित्रादिपदस्य सपिण्डनोद्देश्यमात्र प्रापकत्वात्।

अन्यथा शुक्लादिमासपरिग्रहेपि मलमासकृष्णपक्ष मृते पितरि तत्पूर्व-शुक्लपक्ष मृतायामातुः केनसह सपिण्डनमित्यनध्यवसायो दुर्वारएव-स्यात्। तस्माच्छ्राद्धविवेकादि प्रामाणिक ग्रन्थसिद्धो व्यवहाराविरुद्धः। सर्वत्राब्दिके कृष्णादिमासोल्लेखएवशास्त्रार्थः। सयथासङ्गच्छेत् तत्तथा-मलमासवतित्रर्षे मासिक ह्रासवृद्धी कल्पनीये इतिसिद्धम्। समाप्तेयं मास-मीमांसा।

म० म० गोकुलनाथोपाध्यायविरचिता माससमीमांसा समाप्ता॥